# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ३१

ततो रामो महातेजा विस्मयात्पुनरेव हि ।
उवाच प्रणतो वाक्यमगस्त्यमृषिसत्तमम् ॥ १ ॥

भगवन्किं तदा लोकाः शून्या आसन्द्विजोत्तम ।
धर्षणां यत्र न प्राप्तो रावणो राक्षसेश्वरः ॥ २ ॥

उताहो हीनवीर्यास्ते बभुवुः पृथिवीक्षितः ।
बहिष्कृता वरास्त्रैश्च बहवो निर्जिता नृपाः ॥ ३ ॥

राघवस्य वचः श्रुत्वा अगस्त्यो भगवानृषिः ।
उवाच रामं प्रहसन्पितामह इवेश्वरम् ॥ ४ ॥

स एवं बाधमानस्तु पार्थिवान्पार्थिवर्षभ ।
चचार रावणो राम पृथिव्यां पृथिवीपते ॥ ५ ॥

ततो माहिष्मतीं नाम पुरीं स्वर्गपुरीप्रभाम् ।
सम्प्राप्तो यत्र सान्निध्यं परमं वसुरेतसः ॥ ६ ॥

तुल्य आसीन्नृपस्तस्य प्रतापाद्वसुरेतसः ।
अर्जुनो नाम यस्याग्निः शरकुण्डे शयः सदा ॥ ७ ॥

तमेव दिवसं सोऽथ हैहयाधिपतिर्बली ।
अर्जुनो नर्मदां रन्तुं गतः स्त्रीभिः सहेश्वरः ॥ ८ ॥

रावणो राक्षसेन्द्रस्तु तस्यामात्यानपृच्छत ।
क्वार्जुनो वो नृपः सोऽद्य शीघ्रमाख्यातुमर्हथ ॥ ९ ॥

रावणोऽहमनुप्राप्तो युद्धेप्सुर्नृवरेण तु ।
ममागमनमव्यग्रैर्युष्माभिः संनिवेद्यताम् ॥ १० ॥

इत्येवं रावणेनोक्तास्तेऽमात्याः सुविपश्चितः ।
अब्रुवन्राक्षसपतिमसान्निध्यं महीपतेः ॥ ११ ॥

श्रुत्वा विश्रवसः पुत्रः पौराणामर्जुनं गतम् ।
अपसृत्यागतो विन्ध्यं हिमवत्संनिभं गिरिम् ॥ १२ ॥

स तमभ्रमिवाविष्टमुद्भ्रान्तमिव मेदिनीम् ।
अपश्यद्रावणो विन्ध्यमालिखन्तमिवाम्बरम् ॥ १३ ॥

सहस्रशिखरोपेतं सिंहाध्युषितकन्दरम् ।
प्रपात पतितैः शीतैः साट्टहासमिवाम्बुभिः ॥ १४ ॥

देवदानवगन्धर्वैः साप्सरोगणकिंनरैः ।
साह स्त्रीभिः क्रीडमानैः स्वर्गभूतं महोच्छ्रयम् ॥ १५ ॥

नदीभिः स्यन्दमानाभिरगतिप्रतिमं जलम् ।
स्फुटीभिश्चलजिह्वाभिर्वमन्तमिव विष्ठितम् ॥ १६ ॥

उल्कावन्तं दरीवन्तं हिमवत्संनिभं गिरिम् ।
पश्यमानस्ततो विन्ध्यं रावणो नर्मदां ययौ ॥ १७ ॥

चलोपलजलां पुण्यां पश्चिमोदधिगामिनीम् ।
महिषैः सृमरैः सिंहैः शार्दूलर्क्षगजोत्तमैः ।
उष्णाभितप्तैस्तृषितैः सङ्क्षोभितजलाशयाम् ॥ १८ ॥

चक्रवाकैः सकारण्डैः सहंसजलकुक्कुटैः ।
सारसैश्च सदामत्तैः कोकूजद्भिः समावृताम् ॥ १९ ॥

फुल्लद्रुमकृतोत्तंसां चक्रवाकयुगस्तनीम् ।
विस्तीर्णपुलिनश्रोणीं हंसावलिसुमेखलाम् ॥ २० ॥

पुष्परेण्वनुलिप्ताङ्गीं जलफेनामलांशुकाम् ।
जलावगाहसंस्पर्शां फुल्लोत्पलशुभेक्षणाम् ॥ २१ ॥

पुष्पकादवरुह्याशु नर्मदां सरितां वराम् ।
इष्टामिव वरां नारीमवगाह्य दशाननः ॥ २२ ॥

स तस्याः पुलिने रम्ये नानाकुसुमशोभिते ।
उपोपविष्टः सचिवैः सार्धं राक्षसपुङ्गवः ।
नर्मदा दर्शजं हर्षमाप्तवान्राक्षसेश्वरः ॥ २३ ॥

ततः सलीलं प्रहसान्रावणो राक्षसाधिपः ।
उवाच सचिवांस्तत्र मारीचशुकसारणान् ॥ २४ ॥

एष रश्मिसहस्रेण जगत्कृत्वेव काञ्चनम् ।
तीक्ष्णतापकरः सूर्यो नभसो मध्यमास्थितः ।

मामासीनं विदित्वेह चन्द्रायाति दिवाकरः ॥ २५ ॥

नर्मदा जलशीतश्च सुगन्धिः श्रमनाअ"सन् ।
मद्भयादनिलो ह्येष वात्यसौ सुसमाहितः ॥ २६ ॥

इयं चापि सरिच्छ्रेष्ठा नर्मदा नर्म वर्धिनी ।
लीनमीनविहङ्गोर्मिः सभयेवाङ्गना स्थिता ॥ २७ ॥

तद्भवन्तः क्षताः शस्त्रैर्नृपैरिन्द्रसमैर्युधि ।
चन्दनस्य रसेनेव रुधिरेण समुक्षिताः ॥ २८ ॥

ते यूयमवगाहध्वं नर्मदां शर्मदां नृणाम् ।
महापद्ममुखा मत्ता गङ्गामिव महागजाः ॥ २९ ॥

अस्यां स्नात्वा महानद्यां पाप्मानं विप्रमोक्ष्यथ ॥ ३० ॥

अहमप्यत्र पुलिने शरदिन्दुसमप्रभे ।
पुष्पोपहरं शनकैः करिष्यामि उमापतेः ॥ ३१ ॥

रावणेनैवमुक्तास्तु मारीचशुकसारणाः ।
समहोदरधूम्राक्षा नर्मदामवगाहिरे ॥ ३२ ॥

राक्षसेन्द्रगजैस्तैस्तु क्षोभ्यते नर्मदा नदी ।
वामनाञ्जनपद्माद्यैर्गङ्गा इव महागजैः ॥ ३३ ॥

ततस्ते राक्षसाअ् स्नात्वा नर्मदाया वराम्भसि ।
उत्तीर्य पुष्पाण्याजह्रुर्बल्यर्थं रावणस्य तु ॥ ३४ ॥

नर्मदा पुलिने रम्ये शुभ्राभ्रसदृशप्रभे ।
राक्षसेन्द्रैर्मुहूर्तेन कृतः पुष्पमयो गिरिः ॥ ३५ ॥

पुष्पेषूपहृतेष्वेव रावणो राक्षसेश्वरः ।
अवतीर्णो नदीं स्नातुं गङ्गामिव महागजः ॥ ३६ ॥

तत्र स्नात्वा च विधिवज्जप्त्वा जप्यमनुत्तमम् ।
नर्मदा सलिलात्तस्मादुत्ततार स रावणः ॥ ३७ ॥

रावणं प्राञ्जलिं यान्तमन्वयुः सप्तराक्षसाः ।
यत्र यत्र स याति स्म रावणो राक्षसाधिपः ।
जाम्बूनदमयं लिङ्गं तत्र तत्र स्म नीयते ॥ ३८ ॥

वालुकवेदिमध्ये तु तल्लिङ्गं स्थाप्य रावणः ।
अर्चयामास गन्धैश्च पुष्पैश्चामृतगन्धिभिः ॥ ३९ ॥

ततः सतामार्तिहरं हरं परं
वरप्रदं चन्द्रमयूखभूषणम् ।
समर्चयित्वा स निशाचरो जगौ
प्रसार्य हस्तान्प्रणनर्त चायतान् ॥ ४० ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com